पातिनोऽवगोरणप्रायश्चित्तस्य कथं सिद्धिः। तथाहि मनुः।

अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। अवगूर्य्य ब्राह्मणताड़नार्थं दण्डमुद्यम्य शतयातनाजनकं यत् पापमुत्पादितं तत्क्षयकामः कृच्छ्रप्राजापत्यव्रतं चरेत्। तदुक्तं संयुधिकरणे। शंयोः प्रजापतेः प्रार्थनया देवैर्ब्राह्मणावगोरणफलत्वेन शतयातनाभिहिता। तथा च श्रुतिः। शंयुः प्रजापतिः प्रजाविनेता प्रजाहिते रतस्य देवानां हविर्वहन् आशिषोऽयाचत। देवास्त्ववगोरणे शतयातनास्त्वित्याशिषोऽददतेति। शास्त्रदीपिकादौ दर्शपौर्णमासप्रकरणे। देवा वै शंयुं वार्हस्पत्यमब्रुवन् हव्यं नो वहेति किं मे प्रजाया इति तेऽब्रुवन् यो ब्राह्मणायावगुरेत्तं शतेन यातयेत् यो निहन्यात् तं सहस्रेण यो लोहितमकरोत् यावतः पांशून् अनक्ति तावतः परिवत्सरान् स स्वर्गात्प्रच्यवेत। तस्मात् ब्राह्मणान् नावगुरेत् न हन्यात् न लोहितं कुर्य्यात् इति"। इतिहासात्मकं ब्राह्मणञ्च। इति प्रायश्चित्ततत्त्वं॥

अवग्रहः, पुं, (अव + ग्रह + घञ्।) वृष्टिरोधः। (अनावृष्टिः।
"वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम्"।
"नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे"॥
इति रघुवंशे।) प्रतिबन्धकः। हस्तिललाटं। इति मेदिनी॥ गजसमूहः। इति हारावली॥ स्वभावः। इति त्रिकाण्डशेषः॥ (यदुक्तं,—
"तौ स्थास्यतस्ते नृपतेर्निदेशे
परस्परावग्रहनिर्विकारौ"।
इति मालविकाग्निमित्रनाटकम्।) ज्ञानविशेषः। इति हेमचन्द्रः॥ शापः। इत्यमरटीकायां भरतादयः॥ (ग्रहणं। स्वीकारः। हरणं। अपसारणं। निरोधः। अवरोधः।
"स रोचयामास परेष बन्धं
प्रसह्य रक्षोभिरवग्रहञ्च"।
इति रामायणे। अवान्तरपदसंज्ञां सूचयितुं पदपाठकाले किञ्चित्कालमवस्थानम्। अनादरः। निन्दासूचकवाक्यप्रयोगः।)

अवग्रहणं, क्ली, (अव + ग्रह + भावे ल्युट्।) प्रतिरोधः। अनादरः। इति मेदिनी॥

अवग्राहः, पुं, (अव + ग्रह + घञ्।) ग्रहदोषादिजन्यवृष्टिव्याघातः। सुको इति भाषा। तत्पर्य्यायः। वृष्टिविघातः २ अवग्रहः ३। इत्यमरः॥ हस्तिललाटं। शापः। इति तट्टीका॥ (यथा,—
"अवग्राहस्ते भूयात्"।)

अवघट्टः, पुं, (अव + घट्ट + आधारे घञ्।) भूरन्ध्रं। गर्त्तः। इति त्रिकाण्डशेषः॥

अवघातः, पुं, (अव + हन् + घञ्।) आघातविशेषः। तण्डुलादिकण्डनं। इति हेमचन्द्रः॥ काँड़ान यस्य प्रसिद्धिः। यथा। चरुविधौ विघाकरवाजपेयौ। शास्त्रावधारणवेलायां हि यत्र प्रयोजनाभावादिनिश्चयस्तत्रैव तदुपादानादिलोपः शास्त्रार्थः। यथा कृष्णलेऽवघातादिलोपः। यत्र तदनुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयाच्छास्त्रप्रापितः पदार्थो नियमापूर्व्वमात्रार्थमनुष्ठेयमेव। अतएव प्रकृतावपि आलस्यादिना व्रीह्यादित्यागे तण्डुलादिषु गृहीतेष्ववघातादि समाचरन्ति याज्ञिकाः।
"घाते न्यूने तथा छिन्ने सान्नाय्ये मान्त्रिके तथा।
यज्ञे मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः"॥
सान्नाय्ये हविषि मान्त्रिके मन्त्रसाध्ये अवघातादौ तत्काले मन्त्रपाठाभावेऽपि मन्त्राः प्रयोक्तव्याः। इति शुद्धितत्त्वं॥ (अपमृत्युः)॥

अवचक्रः, त्रि, अवचनस्थः। कथार अवाध्य इति भाषा। न वचः करोतीत्यर्थे वचःशब्दपूर्व्वककृधातोः टप्रत्ययेन निष्पन्नः॥

अवचूर्णितं, त्रि, (अव + चूर्ण + कर्म्मणि क्त।) चूर्णीकृतद्रव्यं। गुँड़ा करा इति भाषा। तत्पर्य्यायः। अवध्वस्तः २ अपध्वस्तः ३। इत्यमरः तट्टीका च॥

अवचूलः, पुं, (अवनता चूड़ा यस्य, वा डस्य लः।) ध्वजाग्रबद्धाधोमुखवस्त्रं। इति हेमचन्द्रः॥

अवचूलकं, क्ली, (अवचूलमिव इवार्थे कन्, संज्ञायां वा कन्।) चामरं। इति त्रिकाण्डशेषः॥

अवच्छिन्नं, त्रि, (अव + छिद् + क्त।) अवच्छेदकतानिरूपकं। विशिष्टं। इति न्यायभाषा। अवच्छेदाश्रयः। यथा। प्रतियोग्यसमानाधिकरणयत्सामानाधिकरण्यात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः। इति सिद्धान्तलक्षणचिन्तामणिः॥ ("जलाशये महाकाशस्तदवच्छिन्नमेव हि।
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम्॥
साभासबुद्धेः कर्तृत्वमवच्छिन्ने विकारिणि"।
इति अध्यात्मरामायणे।)

अवच्छुरितं, क्ली, (अव + छुर + भावे क्त।) महाहास्यं। इत्यमरटीकायां भरतः॥

अवच्छुरितकं क्ली, (अवच्छुरितमेव, स्वार्थे कन्।) महाहास्यं। इति शब्दरत्नावली॥

अवच्छेदः, पुं, (अव + छिद् + भावे घञ्।) परिच्छेदः। एकदेशः। विशेषणत्वं॥
("शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"।
इति साहित्यदर्पणम्।)

अवच्छेदकं, त्रि, (अवच्छिनत्ति, अव + छिद् + ण्वुल्।) न्यायमते अव्याप्यवृत्त्यधिकरणसम्बन्धैकदेशः। इतरव्यावर्त्तकः। विशेषणं। अवच्छिद्यतेऽनेनेति यथा। अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। इति न्यायशास्त्रं॥

अवच्छेदकत्वं, क्ली, (अवच्छेदकस्य भावः, भावार्थे त्व।) स्वरूपसम्बन्धविशेषः। यथा। घटकत्वावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। इत्यवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अनतिरिक्तवृत्तित्वं। यथा। अवच्छेदकत्वञ्च इहानतिरिक्तवृत्तित्वं। तेन विशिष्टस्यासत्वेपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः। इति सामान्यनिरुक्तौ शिरोमणिः॥ अन्यूनानतिरिक्तवृत्तित्वं। यथा। ननु तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वं वाच्यं। वह्नित्वं न घटवृत्ति तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्ति अतथात्वात्तार्णतार्णेति। इत्यवच्छेदकत्वनिरुक्तौ जगदीशः॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वं पारिभाषिकं। यथा। तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यं। इति अवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। तथावच्छेदकत्वं इह शिखरिणि नितम्बे ऊताशनो न शिखरे इत्यादिप्रतीतिबलात् कुत्रचिदव्याप्यवृत्त्यधिकरणदेशविशेषादिदानीं गोष्ठे गौर्नतु गृहे इत्यादिप्रतीतिबलात् कुत्रचित् देशवृत्तितायाः काले कुत्रचित् कालवृत्तिताया देशे अप्यस्ति। इति न्यायशास्त्रं॥

अवच्छेदावच्छेदः, पुं, व्यापकत्वं। इति न्यायभाषा॥

अवज्ञा, स्त्री, (अव + ज्ञा + अङ्।) अनादरः। अवहेला। इत्यमरः॥ ("आत्मन्यवज्ञां शिथिलीचकार"। इति रघुवंशे।)

अवज्ञातं, त्रि, (अव + ज्ञा + क्त।) अवमानितं। अनादृतं। तिरस्कृतं। इत्यमरः॥
"अवज्ञाता भविष्यामो लोकस्य जगतीपते"।
इति महाभारते।)

अवज्ञानं, क्ली, (अव + ज्ञा + भावे ल्युट्।) अवज्ञा। यथा अवज्ञानं अवज्ञा आतो अन्तःअङ्गेरिति डः। सम्पदादित्वात् क्विबिति मधुः। तन्मते गोपावद्रूपं। इत्यमरटीकायां भरतः॥ (अपमानः। तिरस्कारः। अनादरः।
"ईप्सितं तदवज्ञानात् विद्धि सार्गलमात्मनः"।
इति रघुवंशे।)

अवटः, पुं, (अव + अटन्।) छिद्रं। गर्त्तः। कूपः।
("रक्षसां गतसत्त्वानामेष धर्म्मः सनातनः।
अवटे ये निधीयन्ते तेषां लोकाः सनातनाः"॥
इति रामायणे।) कुहकजीवी। इति विश्वमेदिन्यौ॥

अवटिः, पुं, (अव + अटि।) गर्त्तः। इति हलायुधः॥

अवटीटः, त्रि, (अवनता नासिका, प्रादिसमासः, नतार्थे नासायाः टीटादेशः अर्शआदित्वादच्।) नतनासिकः। खाँदा छेपड़ानेको यस्य प्रसिद्धिः। तत्पर्य्यायः। अवनाटः २ अवभ्रटः ३। इत्यमरः॥

अवटुः, पुं, स्त्री, (अव + टीक + मितद्र्वादित्वात् डुः।) ग्रीवापश्चाद्भागः। इत्यमरः॥ घाड़ इतिख्यातः। कूपः। गर्त्तः। इति हेमचन्द्रः॥ वृक्षभेदः। इत्युणादिकोषः॥

अवडङ्गः, पुं, (अवगतो डङ्गः शब्दो यस्मात्।) हट्टः इति जटाधरः। कस्यचिन्मते अवरङ्ग इति पाठः॥

अवडीनं, क्ली, (अव + डी + भावे क्त।) पक्षिणामधोगमनं। पक्षिणामवरोहणं। इति जटाधरः॥

अवतंसः, पुं, क्ली, (अव + तन्स + घञ्।) कर्णपूरः। कर्णभूषणं।
("तं मातरो देवमनुव्रजन्त्यः
स्ववाहनक्षोभचलावतंसाः"।